CANDY TREE

# मुक्तामणि

## संस्कृत पाठमाला

लेखक :
अनुज शर्मा
एम० ए० (संस्कृत)

**सहायक पुस्तिक 6-8**

# मुक्तामणि-6

## 1 प्रार्थना

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. मातृ, पितृ आचार्यश्च देवो भव।

ख. श्लोकानुसारे महादेवः मम पितरौ अस्ति।

ग. माता देवता के समान होती है, पिता देवता के समान होते हैं, आचार्य भी देवता के समान होते हैं।

घ. हे ईश्वर! तुम ही मेरी माता और तुम ही मेरे पिता हो। तुम ही मेरे बन्धु (भाई) और तुम ही मेरे मित्र हो। तुम ही मेरी विद्या तथा तुम ही मेरे धन-संपत्ति हो। हे देवो के स्वामी महादेव! तुम ही मेरे सब कुछ हो।

**2. श्लोक पङ्क्ति पूरयत।**

**उत्तरम्–** त्वमेव **माता च पिता त्वमेव**,
**त्वमेव बन्धुश्च** सखा **त्वमेव**।
**त्वमेव** विद्या **द्रविणं त्वमेव**,
**त्वमेव सर्वं** मम **देव देव**।।

**3. सम्यक् उत्तरं चिह्नांकितं (✓) कुरूत।**

**उत्तरम्–** क. iii त्वम् + एव ख. i जनक ग. ii मेरा/मेरे

**4. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. त्वमेव माता पिता च असि।

ख. हे ईश्वर! त्वमेव मम सत्यं मित्रं असि।

ग. आचार्यो अपि देवो भव।

घ. माता अपि देवो भव।

ङ हे देव! त्वमेव मम सर्वं असि।

**5. समानार्थकानि पदानि लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| बन्धु | = | भ्राता | द्रविणम् | = | धनम् |
| माता | = | जननी | देव | = | सुरः |
| विद्या | = | ज्ञानम् | पितृ | = | जनकः |

**6. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| क. | आचार्योऽपि | = | आचार्यः | + | अपि |
| ख. | त्वमेव | = | त्वम् | + | एव |
| ग. | बन्धुश्च | = | बन्धुः | + | च |
| घ. | मातृदेवो | = | मातृ | + | देवो |

ङ पितृदेवो = पितृ + देवो

**7. वाक्य-निर्माणं कुरूत।**

**उत्तरम्–** क. **आचार्योऽपि** देवो भव।

ख. पितृदेवो **भव**।

ग. **त्वमेव** सर्वं मम देव देव।

घ. त्वमेव बन्धुश्च **सखा** त्वमेव।

ङ त्वमेव **माता** च पिता त्वमेव।

**क्रियात्मकं-कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 2 पर्यावरणम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. अद्यत्वे अनुभूयते यत् यथासमयं वर्षा न भवति, आतपः प्रचण्डतरः भवति शीतप्रकोपश्च प्रतिवर्षं वर्धते।

ख. प्रदूषणस्य चत्वारि क्षेत्राणि सन्ति; तद्यथा—भूमिः, वायुः, जलं ध्वनिश्च।

ग. उद्योगानां धूमेन, प्रक्षेपास्त्रादीनां प्रक्षेपणेन विस्फोटकपदार्थानां स्फोटनेन च वायुप्रदूषणं भवति।

घ. उद्योगयन्त्राणां द्रुतगामिनां यानानां च उच्चध्वनिना आकाशः प्रदूषितो भवति।

ङ. पर्यावरणस्य संरक्षणेन जीवनं सुरक्षितम्, सुखमयं शान्तं च भविष्यति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. अन्यत्र अधिकः **हिमपातः** जनजीवनं त्रासयति।

ख. प्रदूषणस्य मुख्यतः **चत्वारि** क्षेत्राणि सन्ति।

ग. द्रुतगामिनां यानानां ध्वनिना **आकाशः** प्रदूषितो भवति।

घ. मलिनानां विषाक्तानां च पदार्थानां निष्कासनं **नदीषु** न करणीयम्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. वर्षा ख. i. उच्चतराः ग. ii. मलिनतायाः

**4. क्रियापदानि चित्वा लिखत।**

**उत्तरम्–** क. द्रष्टुम्, इच्छति ख. सज्जीभूय, गतवती

ग. बोधयन्, पाठयति घ. रुदन्, यच्छति

ङ. आगत्य खादति

**5. विलोमपदानि लिखत।**

**उत्तरम्–** आगतः = **गतः** अतिवृष्टिः = **अनावृष्टिः**

| | | | | | |
|---|---|---|---|---|---|
| प्राचीना | = | **नवीना** | अनिश्चिता | = | **निश्चिता** |
| न्यूनम् | = | **अल्पम्** | उच्चः | = | **निम्नः** |

**6. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. वर्तमान में संपूर्ण विश्व में ऋतु चक्र की अनिश्चित स्थिति है।

ख. अत्यधिक वर्षा के कारण धन और जीवन सुरक्षित नहीं होता है।

ग. फसली खेतों में रासायनिक खादों का प्रयोग कम करना चाहिए।

घ. गंदे पदार्थ के मिलने से जल में प्रदूषण बढ़ता है।

ङ. कारखानों और गाड़ियों का धुआँ शुद्ध होना चाहिए।

**7. क्रियापदानां वाक्येषु प्रयोगं कुरुत।**

**उत्तरम्–** क. अद्यत्वे वयम् **अनुभवामः** यत् प्रतिक्षणं प्रदूषणं वर्धते।

ख. एवं तु शनैः शनैः जनजीवनमेव **नश्यति**।

ग. कुत्रचित् हिमपातः तु कुत्रचित् अनावृष्टिः जनान् **त्रासयति**।

घ. जलेऽपि प्रदूषणं मलिनपदार्थैः एव **वर्धते**।

ङ. पर्यावरणशुद्धये वृक्षारोपणम् अवश्यं **करणीय**ः।

च. वाहनादीनां धूमः परिष्कृतः **स्यात्**।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 3 श्रमफलम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. देवराजः कृषिकर्मणि अनेकान् भृत्यान् सेवकाञ्च नियुक्तवान्।

ख. देवराजस्य भृत्याः सेवकाश्च अल्पकालमेव कार्यं कुर्वन् इतस्ततश्च भ्रमन् अनर्गलवार्तां च कुर्वन् कार्यं कुर्वन्ति स्म।

ग. देवराजः स्व प्रमादत्वात् कृषिकर्मणि च भृत्यसेवकानाञ्चापि प्रमादेन क्षेत्रोत्पादनस्य क्षमतायाः क्षीणे भूते सति निर्धनः अभवत्।

घ. बलराजः स्वभावेन परिश्रमी आसीत्।

ङ. परिश्रमेव उन्नतेः कारणमिति ज्ञापयति बलराजः देवराजम्।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. एकस्मिन् ग्रामे एकः **धनिकः कृषकः** वसति स्म।

ख. देवराजः बहुप्रमादी **अलसश्चासीत्**।

ग. क्षेत्रेषु **भृत्याः सेवकाः** च स्वेच्छानुसारं **कार्यं** कुर्वन्ति स्म।

घ. परिणामतः देवराजस्य **क्षेत्रोत्पादनस्य** क्षमता क्षीणा अभवत्।

ङ. **अल्पे एव** काले सः बलराज धनिकः अभवत्।

च. मम पार्श्वे तु **बहु भूमिरासीत्** तदा अपि **ऋणी** अभवम्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. भेजकर ख. i. लङ्लकारस्य

ग. ii. विशेषण

**4. निम्नलिखितानां क्रियाणां मूलधातुम्, लकारम्, पुरुषं वचनञ्च लिखत।**

**उत्तरम्–**

| | क्रियापदम् | | मूलधातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| क. | वसति | = | **वस्** | **लट्** | **प्रथम** | **एकवचनम्** |
| ख. | कुर्वन्ति | = | **कृ** | **लट्** | **प्रथम** | **बहुवचनम्** |
| ग. | अभवम् | = | **भू** | **लङ्** | **उत्तम** | **एकवचनम्** |
| घ. | इच्छति | = | **इष्** | **लट्** | **प्रथम** | **एकवचनम्** |
| ङ. | अगच्छन् | = | **गम्** | **लङ्** | **प्रथम** | **बहुवचनम्** |

**5. समानार्थकपदानि लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| कर्मणि | = | **कार्ये** | क्षीणा | = | **नष्टा** |
| दरिद्रः | = | **निर्धनः** | कृषकेन | = | **हलधरेण** |
| परिश्रमम् | = | **उद्योगम्** | भूमिम् | = | **वसुधाम्** |
| पार्श्वे | = | **समीपे** | एतानि | = | **इमानि** |
| धनम् | = | **वित्तम्** | | | |

**6. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. एकस्मिन् ग्रामे देवराजबलराजौ नाम्न्यो: द्वौ कृषकौ अवसताम्।

ख. देवराजः प्रमादत्वात् सर्वं नष्टम् अकरोत्।

ग. अल्पे समये एव बलराजः धनिकः अभवत्।

घ. किं त्वं मह्यं स्व भूमिं दातुम् एषिष्यसि?

ङ. आलस्यं जीवननाशकं दुःखदं च भवति।

**7. निम्नलिखितानां पदानां मूलशब्दम्, विभक्तिं वचनञ्च लिखत।**

**उत्तरम्–**

| | पदम् | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| क. | कर्मणि | **कर्मन्** | **सप्तमी** | **एकवचनम्** |
| ख. | सेवकान् | **सेवक** | **द्वितीया** | **बहुवचनम्** |
| ग. | क्षेत्रेषु | **क्षेत्र** | **सप्तमी** | **बहुवचनम्** |
| घ. | वार्ताः | **वार्ता** | **प्रथमा, द्वितीया** | **बहुवचनम्** |
| ङ. | रुप्यकाणि | **रुप्यकम्** | **प्रथमा, द्वितीया** | **बहुवचनम्** |

**8. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–** क. एतद्धनम् = **एतत् + धनम्**

ख. तृणादिकम् = **तृण + आदिकम्**

ग. सेवकाञ्च = **सेवकान् + च**

घ. अहमपि = **अहम् + अपि**

ङ. निर्धनोऽभूत् = **निर्धनः + अभूत्**

**9. वाक्यनिर्माणं कुरुत।**

**उत्तरम्–** क. अस्मिन् नगरे एकः दयावान् **धनिकः** निवसति।

ख. सौरभः छात्रावासात् पितरं पत्रं **प्रेषयति**।

ग. शनैः शनैः देवराजः **दरिद्रः** अभवत्।

घ. भोः जनाः! क्षेत्रे **सम्यक्** प्रकारेण बीजानि वपन्तु।

ङ. ते **अल्पं** कार्यं कृत्वा सम्पूर्णे समये व्यर्थं जल्पन्ति स्म।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 4 तीर्थस्थलम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. जनाः दूरदेशेभ्यः तीर्थस्थलम् आगच्छन्ति।

ख. पूजया भक्ताः मानसिकीं सन्तुष्टिं प्राप्नुवन्ति।

ग. जनाः निर्धनेभ्यः वस्त्राणि, अन्नानि, धनानि इत्यादिनि वस्तूनि समर्पयन्ति।

घ. शास्त्राणि वदन्ति यत् पिण्डदानेन पितरः मुक्ताः भवन्ति स्वर्गं च विन्दति।

ङ. जनाः देवीदेवेभ्यः यवैः तिलैश्च आहुतयः समर्पयन्ति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. एतत् **तीर्थस्थलम्** अस्ति।

ख. ते **स्नानं** कृत्वा **ईश्वरदर्शनाय** मन्दिरं प्रविशन्ति।

ग. लोकाः **पुण्याय** दानं यच्छन्ति।

घ. केचन जनाः **तीर्थस्थले पितृभ्यः** पिण्डानि अपि यच्छन्ति।

ङ. अन्ते जनाः **यज्ञम्** अपि कुर्वन्ति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. कर्तुम् ख. i. लोकेभ्यः ग. ii. लोकाः

**4. निम्नलिखितेभ्यः शब्देभ्यः उपसर्गान् पृथक् कुरुत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| परोपकारः | = | **पर** | समर्पयति | = | **सम्** |
| प्रवहति | = | **प्र** | सुजनाः | = | **सु** |
| प्रत्यागच्छन्ति | = | **प्रति** | सुशोभते | = | **सु** |

**5. क्रियापदानि एतेषाम् अर्थैः सह मेलयत।**

**उत्तरम्–** क. भवन्ति — iii. **होते हैं**

ख. प्रविशन्ति — iv. **प्रवेश करते हैं**

ग. प्राप्नुवन्ति — v. **प्राप्त करते हैं**

घ. प्रेरयन्ति — vi. **प्रेरित करते हैं**

ङ प्रवहति — i. **बहती है**

च. अर्पयन्ति — ii. **अर्पित करते हैं**

**6. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. इस मंदिर के समीप ही निर्मल और पवित्र नदी बहती है।

ख. लोग ब्राह्मणों को भोजन खिलाते हैं।

ग. वे यज्ञ के लिए समिधाएँ लाते हैं।

घ. धर्म से ही पुण्य मिलता है।

ङ. दान आदि करके सभी लोग घर लौटते हैं।

च. तीर्थस्थलों पर दान आदि करके मन प्रसन्न होता है।

**7. रेखाङ्कितपदानां कारकाणि वचनानि च लिखत।**

| | | |
|---|---|---|
| **उत्तरम्–** क. | कर्ताकारकम् | बहुवचनम् |
| ख. | सम्प्रदान कारकम् | एकवचनम् |
| ग. | कर्ताकारकम् | बहुवचनम् |
| घ. | सम्बन्धभावः | एकवचनम् |
| ङ. | कर्मकारकम् | बहुवचनम् |

**8. वाक्यनिर्माणं कुरुत।**

**उत्तरम्–** क. वाराणसीनगरे **अनेकानि** मन्दिराणि सन्ति।

ख. जनाः **पूजायै** समिधाः आनयन्ति।

ग. केचन जनाः **परोपकाराय** निर्धनेभ्यः वस्त्रधनादिकं यच्छन्ति।

घ. पण्डितादयः लोकेभ्यः **धर्मोपदेशम्** यच्छन्ति।

ङ. मन्यन्ते यत् गङ्गास्नानेन जनाः पापेभ्यः **मुक्ताः** भवन्ति।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 5 शठे शाठ्यं समाचरेत्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. धूर्तः श्रृगालः आत्मानं चतुरः मत्वा अन्यान् जीवान् उपाहसते स्म।

ख. उष्ट्रस्य दीर्घाः जङ्घाः, दीर्घा ग्रीवा, दीर्घं मुखम्, ह्रस्वं पुच्छम्, ह्रस्वे कर्णनेत्रे इत्येतां विचित्रताम् अपश्यत्।

ग. उष्ट्रशृगालौ नदीपारं दशाङ्गुलानि, कर्कटयः, रक्ताङ्गानि, त्रपुषाणि इत्यादीनि खादितुम् अगच्छताम्।

घ. उष्ट्रं शृगालस्य धूर्ततया क्रोधम् उत्पन्नम् अभवत्।

ङ. उष्ट्रः शृगालेन सह 'शठे शाठ्यं समाचरेत्' इति व्यवहारं करोति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. सः वने एकम् **उष्ट्रम् अपश्यत्**।

ख. मम उदरं सर्वदा **रिक्तं तिष्ठति**।

ग. उष्ट्रः सहर्षं शृगालेन सह **गन्तुम्** उद्यतः अभवत्।

घ. अधुनाऽहं जले **स्नास्यामि**।

ङ. धूर्तः शृगालः **जलमध्ये** प्रवहितः मृत्युं च अलभत।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. एकस्मै    ख. i. शृगालः    ग. ii. ईश्वरम्

**4. निम्नलिखितेभ्यः वाक्येभ्यः सर्वनामपदानि चित्वा लिखत।**

**उत्तरम्–** क. सः    ख. अयं    ग. अहम्, अस्य

घ. तव, मम    ङ. एतत् सः, तेन

**5. पर्यायवाचिपदानि लिखत।**

**उत्तरम्–** क. वनम् = **अरण्यम्**    ख. शृगालः = **जम्बुकः**

ग. नेत्रम् = **नयनम्**    घ. नदी = **सरित्**

ङ. शठः = **दुष्टः**

**6. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. एकदा एकः उष्ट्रः वने शुष्कतृणं चरति स्म।

ख. किं त्वमपि नद्याः शीतले जले स्नानं कर्तुम् एषिष्यसि?

ग. अधुना त्वम् ईश्वरं स्मर।

घ. उष्ट्रः शृगालस्य प्रार्थनां न अशृणोत्।

ङ. शठजनाय सुखस्य प्राप्तिः न भवति।

च. शृगालः स्व धूर्ततायाः फलं प्राप्नोत्।

**7. प्रत्ययान् पृथक् कुरुत।**

**उत्तरम्–**

| | | | |
|---|---|---|---|
| मत्वा | = **क्त्वा** | विचार्य | = **ल्यप्** |
| गन्तुम् | = **तुमुन्** | उक्तवान् | = **क्तवतु** |
| पठन् | = **शतृ** | सेवमानः | = **शानच्** |
| कथितम् | = **क्त** | विज्ञाय | = **ल्यप्** |
| पठितः | = **क्त** | | |

**8. वाक्यनिर्माणं कुरुत।**

**उत्तरम्–** क. शृगालः **आत्मानं** बहु चतुरः मन्यते स्म।

ख. कृषकः **क्षेत्रेभ्यः** पशून् अपसारयति।

ग. अस्य बालस्य **स्वभावः** अतीव मृदु अस्ति।

घ. शत्रु सैनिकः नृपं छलेन युद्धक्षेत्रात् **दूरं** नीतवान्।

ङ. **अधुना** अहं पूजायै मन्दिरं गच्छामि।

च. **भयातुरः** दुर्योधनः सरोवरे निलीयते।

छ. भोः मित्रम्! उच्चैः ध्वनिं **मा** कुरु।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 6 शरदोत्सवः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानां उत्तराणि लिखत।**

**उत्तरम्–** क. पाठानुसारं भारतीयाः सूर्यम्, चन्द्रवृक्षादीन् पूजयन्ति।

ख. कवयः प्रकृतिवर्णेन सह चन्द्रस्य वर्णनम् अवश्यं कुर्वन्ति।

ग. अस्यां रात्रौ जनाः पायसं पचन्ति।

घ. शरदोत्सवस्य विषये लोकमान्यता अस्ति यत् अस्यां रात्रौ चन्द्रः स्व किरणैः अमृतमिव किमपि विशिष्टं प्रसारयति।

ङ. अयमुत्सवः 'सर्वैः सह प्रेम्णा व्यवहर्तव्यः' इति सन्देशं प्रददाति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. सम्पूर्णेऽपि **संस्कृतसाहित्ये** एतादृशं वर्णनं **अवलोकयितुं** शक्यते।

ख. शरद्पूर्णिमायाः **रात्रौ** अस्माकं देशे **उत्सवः** आचर्यते।

ग. अस्यां रात्रौ चन्द्रः **स्व पूर्णकलाभिः** सह उदयति।

घ. **सोत्साहं प्रेम्णा च** इमम् उत्सवं **प्रतिवर्षं** जनाः आचरन्ति।

ङ. सर्वैः सह **प्रेम्णा** व्यवहर्तव्यः।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. पायसम्    ख. i. चन्द्रस्य    ग. i. प्रेम्णः

**4. निम्नलिखितानां पदानामर्थान् लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| पक्त्वा | = | **पकाकर** | नीत्वा | = | **लेकर** |
| अवलोकयितुम् | = | **देखने के लिए** | विचार्य | = | **सोचकर** |
| मिलित्वा | = | **मिलकर** | दृष्टवान् | = | **देखा** |

**5. निम्नलिखितेषु वाक्येषु प्रदत्तानि सर्वनामपदानि रेखाङ्कितानि कुरुत लिखत च।**

**उत्तरम्–** क. अस्माकं    ख. अस्यां    ग. सर्वे

घ. इमम्  ङ. वयं सर्वैः

**6. निम्नलिखितानां पदानां लिङ्गम्, वचनं विभक्तिं च लिखत।**

| **उत्तरम्–** | **पदम्** | | **लिङ्गम्** | **वचनम्** | **विभक्तिः** |
|---|---|---|---|---|---|
| क. | पूजकः | = | **पुंल्लिङ्गम्** | **एकवचनम्** | **प्रथमा** |
| ख. | रात्रौ | = | **स्त्रीलिङ्गम्** | **एकवचनम्** | **सप्तमी** |
| ग. | चन्द्रम् | = | **पुंल्लिङ्गम्** | **एकवचनम्** | **द्वितीया** |
| घ. | सहृदयेभ्यः | = | **नपुसंकलिङ्गम्** | **बहुवचनम्** | **चतुर्थी, पञ्चमी** |
| ङ. | कलाभिः | = | **स्त्रीलिङ्गम्** | **बहुवचनम्** | **तृतीया** |

**7. प्रत्ययान् पृथक् कुरुत।**

| **उत्तरम्–** | | | | |
|---|---|---|---|---|
| अवलोकयितुम् = **तुमुन्** | | | पक्त्वा = **क्त्वा** | |
| स्वीकृत्य = **ल्यप्** | | | करणीयः = **अनीयर्** | |
| मिलित्वा = **क्त्वा** | | | व्यवहर्तव्यः = **तव्यत्** | |
| पश्यन् = **शतृ** | | | कृतम् = **क्त** | |

**8. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. हिन्दूजनाः प्रतिदिनं सूर्याय अर्घ्यं यच्छन्ति।

ख. हिन्दूधर्मे तुलसीपादपस्य पूजा क्रियते।

ग. चन्द्रः शीतलतायाः परिचायकः अस्ति।

घ. लोककथासु चन्द्रस्य बहुधा वर्णनं लभते।

ङ. कवयः प्रकृत्या सह चन्द्रस्य वर्णनम् अवश्यं कुर्वन्ति।

**9. वाक्यनिर्माणं कुरुत।**

**उत्तरम्–** क. मम इदं निवेदनं **स्वीकृत्य** माम् अनुगृह्णातु।

ख. त्वया कृतम् **एतादृशं** व्यवहारं समीचीनं नासीत्।

ग. वयं सर्वे **मिलित्वा** समाजस्य उन्नत्यै प्रयासं कुर्याम।

घ. सा भोजनं **पक्त्वा** कार्यालयं गतवती।

ङ. चन्द्रः प्रेम्णः **आधारः** वर्तते।

च. चन्द्रेण **आकृष्टाः** कवयः स्व कवितासु अस्य वर्णनम् अवश्यं कुर्वन्ति।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 7 दुर्जनः परिहर्तव्यः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. दुर्जनः सम्मानयन् अपि हन्ति।

ख. विद्यया (ज्ञानेन) अलङ्कृतः दुर्जनः परिहर्तव्यः।

ग. खलानां सङ्गेन साधवः विपत्तौ आयान्ति।

घ. खलः सर्षपमात्रमिव परेषां छिद्राणि (लघून् दुर्गुणान्) पश्यति।

ङ. दुर्जनः पदे पदे दशति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. हसन्नपि **नृपो** हन्ति।

ख. दुर्जनः **परिहर्तव्यः विद्ययाऽलङ्कृतोऽपि** सन्।

ग. खलः करोति **दुर्वृत्तं नूनं फलति** साधुषु।

घ. खलः **सर्षपमात्राणि परच्छिद्राणि** पश्यति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं (✓) कुरुत।**

**उत्तरम्–** क. iii. एकवचनस्य ख. iii. अव्ययम्

ग. i. सप्तमी

**4. भावार्थं लिखत।**

**उत्तरम्–** क. विद्यया भूषितोऽपि दुर्जनः तथैव परिहर्तव्यः यथा मणिना भूषितः सर्पः। एतौ सदा हानिमेव प्रापयतः न तु लाभम्।

ख. दुर्जनः आत्मनि व्याप्तान् दुर्गुणान् तु कदापि न पश्यति परम् अपरेषां लघून् लघून् दुर्गुणान् अन्वेष्टुं संलग्नः तिष्ठति।

**5. शब्दार्थान् मेलयत।**

| | | | |
|---|---|---|---|
| **उत्तरम्–** क. | पश्यति | iii. | **देखता है** |
| ख. | परिहर्तव्यः | v. | **छोड़ देना चाहिए** |
| ग. | पदे पदे | i. | **कदम-कदम पर** |
| घ. | पश्यन् | iv. | **देखते हुए** |
| ङ. | परिवृतः | ii. | **घिरा हुआ** |

**6. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. दुर्जनस्य सम्मानमपि कुर्याम तु पुनरपि स रुष्टः भवति।

ख. विद्यया अलङ्कृते सति अपि दुर्जनान् परित्यक्तव्यम्।

ग. रावणस्य दुष्टतायाः फलं समुद्रः असहत।

घ. दुर्जनः आत्मनः दुर्गुणान् कदापि न पश्यति।

ङ. सर्पस्तु समये दशति परं दुर्जनः पदे पदे दशति।

**7. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–** क. दुर्जनस्तु = **दुर्जनः + तु**

ख. पश्यन्नपि = **पश्यन् + अपि**

ग. महोदधेः = **महा + उदधेः**

घ. किमसौ = **किम + असौ**

ङ. दुवृत्तम् = **दुर् + वृत्तम्**

**8. निम्नलिखितानां पदानां विभक्तिं वचनञ्च लिखत।**

| **उत्तरम्–** | **पदम्** | | **विभक्तिः** | **वचनम्** |
|---|---|---|---|---|
| क. | विद्यया | = | **तृतीया** | **एकवचनम्** |
| ख. | छिद्राणि | = | **प्रथमा, द्वितीया** | **बहुवचनम्** |
| ग. | गजौ | = | **प्रथमा, द्वितीया** | **द्विवचनम्** |
| घ. | साधुषु | = | **सप्तमी** | **बहुवचनम्** |
| ङ. | नृपाय | = | **चतुर्थी** | **एकवचनम्** |
| च. | सीताम् | = | **द्वितीया** | **एकवचनम्** |

**9. वाक्यनिर्माणं कुरुत।**

**उत्तरम्–** क. सिंहः अनेकान् पशून् **हन्ति**।

ख. विद्यया भूषितः दुर्जनः सदा **परिहर्तव्यः**।

ग. वनदस्युः एकं बालम् **अहरत्**।

घ दुर्जनः आत्मनि व्याप्तान् दुर्गुणान् **पश्यन्** अपि न पश्यति।

ङ सर्पः कालेन **दशति** परं दुर्जनः पदे पदे।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 8 अस्माकं राष्ट्रपुष्पम्

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. कमले बहवः गुणाः विद्यमानाः सन्ति अतएव कमलम् अस्माकं राष्ट्रपुष्पम् अस्ति।

ख. कमलस्य उत्पत्तिः पङ्के भवति।

ग. कमलस्य प्रथमः गुणः अयमस्ति यत् एतस्य प्रकाशेन सह स्नेहः अस्ति यतोहि सूर्यास्ते भूते सति कमलमपि म्लानं भवति।

घ. पङ्केऽपि उत्पन्नं कमलं स्व सौन्दर्येण, सुगन्धेन निर्लेपत्वेन च मानं प्राप्नोति।

ङ. संस्कारः गुणश्च प्रधानौ स्तः।

च. यथा जलेन वृद्धिं प्राप्ते सति कमलमपि वृद्धिं याति तस्य च शुष्के सति कमलमपि नश्यति, तथैव वयमपि देशस्य उन्नतौ स्व उन्नतिं तस्य अवनतौ च स्व अवनतिं मानयेम।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. अस्माकं देशस्य **राष्ट्रपुष्पं कमलम्** अस्ति।

ख. एतस्य प्रकाशेन सह **स्नेहः** अस्ति।

ग. **सूर्यस्य प्रकाशेन** एतत् विकसति।

घ. जले एव एतस्य **उत्पत्तिः** तत्रैव **च वृद्धिः** अस्ति।

ङ. अयं गुणः **देशभक्तिं** सिद्धयति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. म्लानम्    ख. iii. पङ्कजः    ग. iii. उभयम्

**4. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–** क. कमलमपि = **कमलम् + अपि**

ख. वृद्धिश्च = **वृद्धिः + च**

ग. ज्ञानेच्छुकाः = **ज्ञान + इच्छुकाः**

घ. भूत्वाऽपि = **भूत्वा + अपि**

ङ. अन्यच्च = **अन्यत् + च**

**5. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. कमलस्य जीवनम् अस्मान् अज्ञानात् दूरं स्थातुं शिक्षां ददाति।

ख. कमलपुष्पं सर्वेषां मनः आकर्षति।

ग. संस्कृतसाहित्ये कमलस्य पर्याप्तं वर्णनं लभते।

घ. गुणैः विभूषिताः जनाः सर्वत्र सम्मानं प्राप्नुवन्ति।

ङ. गुणाभावे उच्चकुले उत्पन्नाः जना अपि उपहासपात्राणि भूयन्ते।

**6. सर्वनामपदानि चित्वा लिखत।**

**उत्तरम्–** क. अस्माकम्    ख. अस्मिन्    ग. एषः

घ. अयम्    ङ. वयम्, तेषु

**7. समानार्थकपदानि लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| राष्ट्रः | = | **देशः** | पुष्पम् | = | **कुसुमम्** |
| कमलम् | = | **पङ्कजः** | सूर्यः | = | **दिनकरः** |
| लाभम् | = | **हितम्** | चित्तम् | = | **मनः** |
| सदा | = | **सर्वदा** | स्नेहः | = | **प्रेम** |

**8. वाक्यनिर्माणं कुरुत।**

**उत्तरम्–** क. कमलस्य सौंदर्यम् **अद्भुतम्** अस्ति।

ख. रामलक्ष्मणयोः **स्नेहः** लोकप्रसिद्धः अस्ति।

ग. कमलपुष्पेण विविधा **शिक्षा** लभते।

घ. कमलं स्वगुणैः समाजे **मानं** प्राप्नोति।

ङ. शनैः शनैः पादपोऽयं **वृद्धिं** गच्छति।

च. जले स्थितेऽपि कमलम् **आर्द्रं** न भवति।

**9. निम्नलिखितानां पदानां विभक्तयः लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| कमलस्य | = | **षष्ठी** | प्रकाशेन् | = | **तृतीया** |
| पङ्कात् | = | **पञ्चमी** | शिक्षाम् | = | **द्वितीया** |
| समाजे | = | **सप्तमी** | लाभाय | = | **चतुर्थी** |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 9 कल्पितः भिक्षुकः

### अभ्यासः

**1. निम्नलिखितानां प्रश्ननाम् उत्तराणि लिखत।**

**उत्तरम्–** क. भिक्षुकः गोधूमचूर्णं भिक्षया सञ्चितेन धनेन क्रीणाति स्म।

ख. घटः एकस्मिन् नागदन्ते लम्बमानः आसीत्।

ग. भिक्षुकः शयन् अचिन्तयत् यत् शीघ्रमेव घटोऽयं गोधूमचूर्णेन पूरयिष्यति तत् हट्टे विक्रीय प्रभूतं धनं प्राप्स्यामि। तेन धनेन एकां धेनुं क्रेष्यामि या मह्यं पर्याप्तं दुग्धं दास्यति। तत् दुग्धं विना मूल्यं कस्मै अपि न दत्वा सर्वं विक्रीय तेन प्राप्तेन धनेन सुन्दरं गृहं निर्मापयिष्यामि पुनश्च विवाहं कृत्वा सुखेन निवसिष्यामि इति।

घ. भिक्षुकेन स्वप्ने स्व अबाध्यां पत्नीं पादेन ताडनोपक्रमे चूर्णपूरितः घटः भग्नः।

ङ. निरूद्यमस्य जनस्य केवलं कल्पितं सुखं दुःखाय भवति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. सः प्रतिदिनं **भिक्षाटनं** करोति स्म।

ख. **चूर्णपूरितं घटं** हट्टं नेष्यामि।

ग. पादेन **ताम् अबाध्यां** पत्नीं ताडयिष्यामि।

घ. **कल्पितं** सुखं दुःखाय एव भवति।

ङ. **तेन** धनेन धेनुं क्रेष्यामि।

च. भिक्षुकः **तत् चूर्णपूरितं** घटमेव पादेन अताडयत्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. लट्लकारस्य  ख. ii. सर्वनाम

ग. iii. सप्तमी

**4. निम्नलिखितेभ्यः शब्देभ्यः विशेषणानि चित्वा लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| अलसः बालः | = | **अलसः** | सुन्दरं भवनम् | = | **सुन्दरं** |
| प्रभूतं धनम् | = | **प्रभूतं** | कल्पितं सुखम् | = | **कल्पितं** |
| मधुरं दुग्धम् | = | **मधुरं** | उच्चा लता | = | **उच्चा** |
| लघ्वी नदी | = | **लघ्वी** | निर्मलं जलम् | = | **निर्मलं** |

**5. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–** क. बिन्दुमपि = **बिन्दुम् + अपि**

ख. सन्मार्गम् = **सत् + मार्गम्**

ग. घटमेव = **घटम् + एव**

घ. विद्वज्जनम् = **विद्वत् + जनम्**

ङ. राष्ट्रोऽपि = **राष्ट्रः + अपि**

**6. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. सः चूर्णम् अभुक्त्वा एकस्मिन् घटे एकत्रितं करोति स्म।

ख. धेनोः पर्याप्तं दुग्धं भविष्यति।

ग. मम पत्नी वारं वारं गृहं गन्तुं वदिष्यति।

घ. अहं तां पादेन ताडयिष्यामि।

ङ. सम्पूर्णं चूर्णं भूमौ प्रसरितम्।

**7. निम्नलिखितानां पदानाम् अर्थं लिखत वाक्यानि च रचयत।**

**उत्तरम्–** क. सञ्चितेन = **इकट्ठा करने से**

तेन **सञ्चितेन** धनेन अहम् एकां द्विचक्रिकां क्रेष्यामि।

ख. शय्यायाम् = **बिस्तर पर**

विभुः पाठं स्मृत्वा रात्रौ दशवादने **शय्यायां** शयितुम् अगच्छत्।

ग. पर्याप्तम् = **पर्याप्त**

एषा धेनुः मह्यं **पर्याप्तं** दुग्धं दास्यति।

घ. अनुनयम् = **प्रार्थना**

सा मां मुहुर्मुहुः **अनुनयं** करिष्यति।

ङ. तदर्थम् = **उसके लिए**

कमलः परीक्षायां प्रथमं स्थानं प्राप्तुम् इच्छति, **तदर्थं** स अहर्निशम् एकं करोति।

**8. रेखाङ्कितानां पदानां विभक्तिं लिङ्गं च लिखत।**

| | | |
|---|---|---|
| **उत्तरम्–** क. | द्वितीया | नपुंसकलिङ्गम् |
| ख. | तृतीया | नपुंसकलिङ्गम् |
| ग. | तृतीया | पुंल्लिङ्गम् |
| घ. | सप्तमी | स्त्रीलिङ्गम् |
| ङ. | द्वितीया | स्त्रीलिङ्गम् |
| च. | षष्ठी | नपुंसकलिङ्गम् |
| छ. | चतुर्थी | नपुंसकलिङ्गम् |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 10 लुब्धः भूपतिः

## अभ्यासः

**1. निम्नलिखितानां प्रश्ननाम् उत्तराणि लिखत।**

**उत्तरम्–** क. लुब्धस्वभावेन मायादासः दरिद्रवत् जीवनं यापयति स्म।

ख. सन्तुष्टः मुनिः नृपम् अवदत् यत् स्वस्त्यस्तु ते। अभीष्ट वरं वरय इति।

ग. लोभेनाभिभूतः भूपतिः वररूपेण याचते यत् मया स्पृश्यमानाः पदार्थाः सौवर्णाः भवन्तु इति।

घ. भूपतिः मायादासः पिपासया आतुरः जातः।

ङ. अन्ते मायादासः मुनेः अयाचत् यत् कृपया भवान् दत्तं वरं निवर्तयतु। इयं मम कुमारी जीवतु इति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. एकस्मिन् देशे कश्चिद् **लुब्धः भूपतिः** वसति स्म।

ख. **'तथास्तु'** एवमुक्त्वा सः मुनिः **अन्तर्धानः** अभवत्।

ग. तेन स्पृष्टं जलमपि **सुवर्णपिण्डम्** अभवत्।

घ. मायादासः **शोकेन उच्चैः** अरोदीत्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. i. अव्ययम् ख. iii. प्राप्य ग. i. श्रु

**4. रेखाङ्कितानां पदानां कारकाणि लिखत।**

**उत्तरम्–** क. सम्बन्धभावः ख. कर्मकारकम्

ग. करणकारकम् घ. सम्बन्धभावः

**5. विशेषणानि पृथक् कुरुत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| दुःखिता राजकुमारी | = | **दुःखिता** | सन्तुष्टः मुनिः | = | **सन्तुष्टः** |
| लुब्धः भूपतिः | = | **लुब्धः** | पिपासितः नृपतिः | = | **पिपासितः** |
| स्वर्णमयी बालिका | = | **स्वर्णमयी** | निष्कण्टकं राज्यम् | = | **निष्कण्टकं** |
| सुन्दराणि पुष्पाणि | = | **सुन्दराणि** | दरिद्रवत् जीवनम् | = | **दरिद्रवत्** |

**6. निम्नलिखितानां पदानां लिङ्गं वचनञ्च लिखत।**

**उत्तरम्–**

| | पदम् | | लिङ्गम् | वचनम् |
|---|---|---|---|---|
| क. | जीवनम् | = | **नपुंसकलिङ्गम्** | **एकवचनम्** |
| ख. | सौवर्णानि | = | **नपुसंकलिङ्गम्** | **बहुवचनम्** |
| ग. | सत्कारेण | = | **पुंल्लिङ्गम्** | **एकवचनम्** |
| घ. | इमानि | = | **नपुंसकलिङ्गम्** | **बहुवचनम्** |

**7. क्रियापदानि चिनुत लिखत च।**

**उत्तरम्–** क. आसीत्  ख. यापयति स्म

ग. उक्त्वा, अभवत्  घ. स्पृष्टा, जाता

**8. सन्धिं कुरुत।**

**उत्तरम्–** क. मञ्जरीम् + आदाय = **मञ्जरीमादाय**

ख. स्वस्ति + अस्तु = **स्वस्त्यस्तु**

ग. तत्र + एव = **तत्रैव**

घ. एवम् + उक्त्वा = **एवमुक्त्वा**

**9. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. मायादास अधिक-से-अधिक स्वर्ण इकट्ठा करना चाहता था।

ख. मेरे द्वारा छुई गई वस्तुएँ सोने की ही जाएँ।

ग. हे मुनि! कृपया दिए वर को लौटा लीजिए। मेरी यह पुत्री जीवित हो जाए।

घ. जल से भीगी हुई वस्तुएँ पूर्व अवस्था में हो गईं।

ङ. अधिक लोभ नहीं करना चाहिए।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 11 मार्गः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. मार्गः सुदूरं यावत्, निरन्तरम् अहर्निशं च चलति।

ख. मार्गः कर्तव्यपथा सततं गच्छन् अनुभूतानि कष्टानि न गण्यति।

ग. मार्गस्योपरि बस द्विचक्रिका त्रिचक्रिकादीनि विविधानि वाहनानि चलन्ति।

घ. वाहनैः निःसृतैः धूमैः कष्टं प्राप्तान् वृक्षान् वीक्ष्य मार्गस्य दुःखं वर्धते।

ङ. हरितानि पत्राणि विविधानि च कुसुमानि दृष्ट्वा मार्गस्य चित्तं प्रसीदति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. अहं **राजमार्गो** अस्मि।

ख. अहं **बहूनि कष्टानि** अनुभवामि।

ग. एतेन मे **सन्तोषः** जायते।

घ. पश्य एतान् **गर्तान्**।

ङ. एवं **यातायातेन** मे शरीरे **व्रणाः** जायन्ते।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. बहुत दूर  ख. iii. मार्गम्  ग. iii. तुमुन्

**4. निम्नलिखितानां क्रियापदानां धातुम्, पुरुषं लकारं च लिखत।**

**उत्तरम्–**

| | क्रियापदम् | | धातुः | पुरुषः | लकारः |
|---|---|---|---|---|---|
| क. | जानीथ | = | **ज्ञा** | **प्रथम** | **लट्** |
| ख. | अनुभवामि | = | **अनुभू** | **उत्तम** | **लट्** |
| ग. | गणयसि | = | **गण्** | **मध्यम** | **लट्** |
| घ. | वर्धते | = | **वर्ध्** | **प्रथम** | **लट्** |
| ङ. | करिष्यथ | = | **कृ** | **मध्यम** | **लृट्** |

**5. निम्नलिखितेभ्यः वाक्येभ्यः सर्वनामपदानि पृथक् कुरुत।**

**उत्तरम्–** क. यूयम्, अहम् ख. एतेन, मे, ग. मे

घ. ते, मम ङ. मम

**6. समानार्थकानि पदानि मेलयत।**

**उत्तरम्–**

| | | | |
|---|---|---|---|
| क. | जायते | iii. | **भवति** |
| ख. | वीक्ष्य | v. | **दृष्ट्वा** |
| ग. | सततम् | ii. | **निरन्तरम्** |
| घ. | रमणीयम् | i. | **सुन्दरम्** |
| ङ. | आपदानाम् | iv. | **कष्टानाम्** |

**7. हिन्द्याम् अनुवादं कुरुत।**

**उत्तरम्–** क. बहुत-से कष्ट सहकर भी मैं इन्हें नहीं गिनता हूँ।

ख. मेरे ऊपर बहुत-से वाहन तीव्रगति से दौड़ते हैं।

ग. पथिक मेरे ऊपर कूड़ा फेंकते हैं।

घ. इन प्रसन्न वृक्षों को देखकर मैं अपना सारा कष्ट भूल जाता हूँ।

ङ. वर्षा का जल मेरा मुँह धोता है।

**8. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–**

| | | | |
|---|---|---|---|
| क. | कोऽहम् | = | **कः + अहम्** |
| ख. | ममोपरि | = | **मम + उपरि** |
| ग. | कोऽपि | = | **कः + अपि** |
| घ. | धावन्त्युपरि | = | **धावन्ति + उपरि** |
| ङ. | वर्षर्तौ | = | **वर्षा + ऋतौ** |
| च. | परमहम् | = | **परम् + अहम्** |

**9. रेखाङ्कितानां पदानां कारकं वचनञ्च लिखत।**

**उत्तरम्–**

| | | |
|---|---|---|
| क. | कर्म कारकम् | बहुवचनम् |
| ख. | अधिकरण कारकम् | एकवचनम् |
| ग. | करण कारकम् | एकवचनम् |

घ. सम्बन्ध भाव: एकवचनम्

ङ. कर्ता कारकम् बहुवचनम्

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 12 भारतदेशः

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. मम देशस्य नाम भारतवर्षम्।

ख. भारतदेश: समेषां पूज्य:।

ग. कश्मीरप्रदेश: स्व रमणीयतया पृथिव्यां स्वर्गभूत:।

घ. भारतस्य चरणौ वारीश: प्रक्षालयति।

ङ. सर्वत्र एकत्वस्य सन्देश: उद्घोष्यते।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. मदीयो **भारतं** देशो **मदीयो भारतं** देश:।

ख. नतो गर्वेण **वारीश:**।

ग. विभिन्ना: **जातिधर्मा: वर्गभाषा:** प्रचलिता: अस्मिन्।

घ. वयं वै भारतीया **अस्मदीयो** देश:।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. i. त्वदीयो ख. ii. आत्मनेपदी ग. ii. सागर:

**4. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. मदीयो भारतं देश: विश्वे अद्भुत: देश: अस्ति।

ख. अत्रत्य समाजसुधारका: एकताया: सन्देशं ददति।

ग. वैदेशिका अपि अस्या: पवित्रधराया: दर्शनाय आयान्ति।

घ. अत्र विभिन्ना: धर्मानुयायिन: वसन्ति।

**5. निम्नलिखितानां पदानां विभक्तिम्, लिङ्गं वचनञ्च लिखत।**

**उत्तरम्–**

| | पदम् | | विभक्ति: | लिङ्गम् | वचनम् |
|---|---|---|---|---|---|
| क. | मम | = | **षष्ठी** | **उभयलिङ्गम्** | **एकवचनम्** |
| ख. | समेषाम् | = | **षष्ठी** | **उभयलिङ्गम्** | **बहुवचनम्** |
| ग. | पृथिव्याम् | = | **सप्तमी** | **स्त्रीलिङ्गम्** | **एकवचनम्** |
| घ. | वारीश: | = | **प्रथमा** | **पुंल्लिङ्गम्** | **एकवचनम्** |
| ङ. | अस्मिन् | = | **सप्तमी** | **पुंल्लिङ्गम्, नपुंसकलिङ्गम्** | **एकवचनम्** |

**6. वाक्यनिर्माणं कुरुत।**

**उत्तरम्–** क. समेषां पूज्यः अस्ति मम **देशः**।

ख. विद्वज्जनोऽयं **सम्मान्यः**।

ग. कश्मीरः एकः **रम्यः** प्रदेशः अस्ति।

घ. भारतदेशः एकतायाः प्रेम्णश्च **सन्देशः** ददाति।

ङ. अस्य देशस्य **वयं** प्राणपणेन रक्षां कुर्याम।

**7. समानार्थकानि पदानि लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| मदीयो | = | **मम** | देशः | = | **राष्ट्रः** |
| स्वर्गः | = | **देवलोकः** | वारीशः | = | **सागरः** |
| व्योमः | = | **आकाशः** | धरा | = | **वसुधा** |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 13 मूर्खः सिंहः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. शृगालः वने इतस्ततः भोजनम् अन्वेषयन् मित्रैः सह च आलपन् वसति स्म।

ख. गुहा एकस्यां दीर्घशिलायाम् आसीत्।

ग. सिंहः गुहायां प्रविशति विचारयति च यत् अद्य अहं शृगालं खादिष्यामि।

घ. शिलारूपेण सिंहः वदति यत् आगच्छ वत्स! स्वागतं ते! कथं विलम्बेन आगच्छसि? इति।

ङ. शृगालः चतुरः आसीत् यतोहि तेन स्व तार्किकबुद्धया ज्ञातं यत् सिंह एव गुहायाम् अस्ति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. तस्मिन् वने एका **दीर्घा शिला आसीत्**।

ख. परं सः **गुहायाः अभ्यान्तरं** न गच्छति।

ग. यदि अहम् **अन्तः** प्रविशामि, मम **मृत्युः** निश्चिता।

घ. सिंहः शिलारूपेण **सम्भाषणं** करोति।

ङ. सिंहः **तूष्णीं** तिष्ठति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. अव्ययीभावः     ख. ii. अंदर

ग. i. लट् लकारः

**4. क्रियापदानि एतेषाम् अर्थैः सह मेलयत।**

**उत्तरम्–** क. वसति     iii. **रहता है**

ख. आलपति     v. **बातचीत करता है**

ग. अप्रविशत् iv. **घुस गया**

घ. चिन्तयामि i. **सोचता हूँ**

ङ. तिष्ठति vi. **ठहरता है**

च. रक्षति ii. **रक्षा करता है**

**5. निम्नलिखितानि पदानि व्यवस्थितरूपे लिखत।**

**उत्तरम्–** क. शृगालः वने इतस्ततः भ्रमति स्म।

ख. सिंहः शृगालस्य प्रतीक्षां करोति।

ग. शृगालः उच्चैः वदति स्म।

घ. अद्य तु अहं क्षुधितः मरिष्यामि।

**6. निम्नलिखितेषु वाक्येषु प्रदत्तानि अव्ययदानि रेखाङ्कितानि कुरुत लिखत च।**

**उत्तरम्–** क. अपि ख. यदा, तदा ग. तत्र

घ. कदाचित्, अद्य, अत्र ङ. अहम्, अन्तः न

**7. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. वह अपने मित्रों के साथ बातचीत करता था।

ख. एक शेर उस गुफा में प्रवेश करता है।

ग. वह उसकी प्रतीक्षा करता है।

घ. हे शिला! तुम कैसे आज मेरा स्वागत नहीं कर रही हो?

ङ. गीदड़ गुफा के अंदर नहीं जाता है।

च. वह शीघ्र वहाँ से भागता है और प्राण बचाता है।

**8. वाक्यनिर्माणं कुरुत।**

**उत्तरम्–** क. पार्थ! त्वम् **इतस्ततः** किमर्थं भ्रमसि?

ख. जनकेन **सह** बालोऽपि हट्टं गच्छति।

ग. शृगालः गुहायाः **बहिः** सिंहस्य पदचिह्नं पश्यति।

घ. **अद्य** तु एवं प्रतीयते यत् मम क्षुधायाः मृत्यु एव भविष्यति।

ङ. त्वं तु जानासि एव यत् अहम् अन्तः **न** आगमिष्यामि।

च. शृगालवार्तां श्रुत्वा सिंह किञ्चित् कालं मौनं तिष्ठति पुनः **च** उच्चैः वदति।

छ. यावत् अहं न आगच्छेयं **तावत्** त्वया अत्रैव स्थातव्यम्।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 14 श्रवणकुमारः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. राजा दशरथः पिपासया व्याकुलो भूत्वा नद्याः तीरम् अगच्छत्।

ख. स्व पिपासिताभ्यां पितृभ्यां जलमानेतुं श्रवणः नदीतीरम् अगच्छत्।

ग. बिद्धं श्रावणकुमारं दृष्ट्वा राजा दशरथः दुःखितः अभवत्।

घ. श्रवणकुमारः दशरथम् अकथयत् यत् हे राजन्! मम प्राणाः निर्गच्छन्ति। भवान् मम मात्रे पित्रे च जलं नीत्वा गच्छतु।

ङ. श्रवणकुमारस्य पितरौ दशरथं अकथयताम्—"राजन्! यथा अद्य आवां पुत्रवियोगेन प्राणान् त्यजावः तथैव त्वमपि पुत्र वियोगेन स्व प्राणान् त्यक्ष्यसि।"

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. एकदा सः **आखेटाय** वनम् अगच्छत्।

ख. सः **पिपासया** व्याकुलः अभवत्।

ग. सः स्व **पितरं तीर्थयात्रां** कारयितुम् आगतः आसीत्।

घ. तस्य **पितरौ** अन्धौ आस्ताम्।

ङ. श्रवणं दृष्ट्वा सः महत् **दुःखितः** अभवत्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. गम्    ख. i. सर्वनाम    ग. i. क्त्वा

**4. निम्नलिखितान् शब्दान् संशोधयत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| प्राणा | = | **प्राणाः** | जलारथम् | = | **जलार्थम्** |
| भ्रमण् | = | **भ्रमणम्** | व्रिद्धौ | = | **वृद्धौ** |
| तथेव | = | **तथैव** | भक्ती | = | **भक्तिः** |

**5. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–** क. जलमानेतुम् = **जलम् + आनेतुम्**

ख. यथैव = **यथा + एव**

ग. पापोऽयम् = **पापः + अयम्**

घ. ताभ्यामपि = **ताभ्याम् + अपि**

ङ. बिद्धोऽसि = **बिद्धः + असि**

**6. उचितैः क्रियारूपैः वाक्यानि पूरयत।**

**उत्तरम्–** क. राजा दशरथः भ्रमणाय वनम् **आगच्छत्**।

ख. तौ शुकौ बुभुक्षया व्याकुलौ **आस्ताम्**।

ग. सः घटे पाषाणखण्डान् **क्षिपति**।

घ. तौ अपि स्व प्राणान् **अत्यजताम्**।

**7. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. वने बहु दूरं निर्गमनेन राजा दशरथः मार्गम् अविस्मरत्।

ख. तत्समये श्रवणकुमारः स्व पितृभ्यां सह नदीतटे स्थितः आसीत्।

ग. बाणेन बिद्धं श्रवणं दृष्ट्वा राजा दशरथः महत् दुःखितः अभवत्।

घ. हे राजन्! मम प्राणाः निर्गच्छन्ति।

ङ. मां क्षम्यतां भद्रजन! अज्ञानतया मत् पापोऽयम् अभवत्।

च. एतत् उक्त्वा तौ अपि प्राणान् अत्यजताम्।

**8. रेखाङ्कितानां पदानां विभक्तिम्, वचनं लिङ्गं च लिखत।**

**उत्तरम्–** क. तृतीया    एकवचनम्    स्त्रीलिङ्गम्

ख. प्रथमा द्विवचनम् पुंल्लिङ्गम्
ग. द्वितीया एकवचनम् स्त्रीलिङ्गम्
घ. तृतीया एकवचनम् नपुंसकलिङ्गम्
ङ. चतुर्थी एकवचनम् स्त्रीलिङ्गम्, पुंल्लिङ्गम्

**9. वाक्यनिर्माणं कुरुत।**

**उत्तरम्–** क. सः स्व पाठम् **अविस्मरत्**।
ख. श्रवणः स्व पितरौ तीर्थयात्रां **कारयितुम्** आगतः आसीत्।
ग. दशरथः ध्वनिम् **अनुसृत्य** बाणम् अमुञ्चत्।
घ. पापोऽयं मया **कृतः**, क्षम्यताम्।
ङ. सः जलं **नीत्वा** तयोः समीपम् अगच्छत्।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 15 विभिन्नाः व्यवसायिनः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. अध्यापकः छात्रान् अध्यापयति राष्ट्रस्य च निर्माणं करोति।
ख. रुग्णजनान् औषधादिकं दत्वा रोगमुक्तं करणं चिकित्सकस्य कार्यम् इति।
ग. आरक्षकस्य सहायतया जनाः भयमुक्ताः भवन्ति।
घ. कृषकेन परिश्रमपूर्वकम् उत्पादेभ्यः बीजेभ्यः वयम् अन्नादिकं प्राप्नुमः।
ङ. काष्ठैः मञ्च, आसन्दिका, पेटिका, काष्ठासनम् इत्यादिकं निर्मीयते।
च. वस्त्रैः वयं स्व शरीरम् उष्णतया शीतादिना च रक्षामः।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. एषः छात्रान् **अध्यापयति**।
ख. आरक्षकः **जनान्** रक्षति।
ग. कृषकः हलेन **क्षेत्राणि कर्षति**।
घ. एतेषामपि बहुषु **कार्येषु उपयोगं** भवति।
ङ. **उष्णतया शीतेन** च स्व शरीरं **रक्षामः**।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. लिखित्वा ख. ii. निर् ग. iii. कठोरः

**4. क्रियापदानि चित्वा लिखत।**

**उत्तरम्–** क. श्रावयति ख. ददाति ग. कर्षाति
घ. निर्मापयति

**5. उचितं मेलनं कुरुत।**

**उत्तरम्–** क. कृषकः iii. **कृषिकार्यं करोति।**
ख. आरक्षकः v. **जनान् रक्षति।**

ग. सौचिक: — vi. **वस्त्राणि सीव्यति।**
घ. चिकित्सक: — iv. **चिकित्सां करोति।**
ङ. तक्षक: — i. **काष्ठवस्तूनि निर्मापयति।**
च. कुम्भकार: — ii. **मृत्तिकापात्राणि निर्मापयति।**

**6. रेखाङ्कितानां पदानां कारकाणि लिखत।**

**उत्तरम्–** क. करणकारकम् ख. सम्बन्धभाव:
ग. कर्ताकारकम् घ. कर्मकारकम्

**7. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. अस्माकं विद्यालयस्य सर्वा: अध्यापिका: स्नेहेन पाठयन्ति।
ख. आरक्षका: देशस्य आन्तरिकां सुरक्षां कुर्वन्ति।
ग. चिकित्सक: उपचारं करोति।
घ. एतेषामपि बहुषु कार्येषु उपयोगं भवति।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 16 पत्रलेखनम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. भावेशेन पत्रं दिल्लीत: लिखितम्।
ख. देहलीनगरं अतीव सुन्दरम् अस्ति।
ग. कुतुबमीनार: देहली नगरे अस्ति।
घ. पाण्डवकालस्य स्मरणं प्रतिजनं पराकाष्ठां नयति।
ङ. भावेश: निश्चयं कृतं यत् यदपि द्रष्टव्यम् अस्ति तत्सर्वं पदाति एव द्रक्ष्यामि।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. तव **वार्ताम्** अनुसृत्य अहम् अत्र **अद्य प्रात:** एव आगत:।
ख. **हस्तिनापुरं** तु मेरठमण्डले अस्ति।
ग. पाण्डवकालस्य स्मरणम् अपि प्रतिजनं **पराकाष्ठां** नयति।
घ. अत्र तु अस्मिन् मासे **सूर्यस्त आतपेन** अतीव घर्म: भवति।
ङ. अहं न अश्वरथेन **भ्रमामि** न च 'मोटर' इति नाम्ना प्रसिद्धेन **तैलयानेन**।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. ल्यप् ख. i. आत्मनेपदी ग. ii. अपि

**4. सन्धिं विच्छेदं वा कुरुत।**

**उत्तरम्–** प्रात: + एव = **प्रातरेव**
महा + आशय: = **महाशय:**
नमस्कारम् = **नम: + कारम्**

| | | |
|---|---|---|
| पठनञ्च | = | **पठनम् + च** |
| किञ्चिदपि | = | **किञ्चित् + अपि** |
| भ्रमणम् + अपि | = | **भ्रमणमपि** |
| अस्मात् + अपि | = | **अस्मात्दपि** |
| मनोहरम् | = | **मनः + हरम्** |
| तत्सर्वम् | = | **तत् + सर्वम्** |
| क्षेत्रेष्वपि | = | **क्षेत्रेषु + अपि** |
| प्रसिद्धम् + आसीत् | = | **प्रसिद्धमासीत्** |
| सर्वानपि | = | **सर्वान् + अपि** |

**5. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. अहम् अद्यैव प्रातः दिल्लीं प्रति आगतः अस्मि।

ख. इतः अहम् अमृतसरं गमिष्यामि।

ग. देहलीनगरं 'इन्द्रप्रस्थ' अपि कथ्यते।

घ. मुकुन्दजैनः अस्य नगरस्य धनाढ्यः जनः अस्ति।

ङ. अहं गृहमागत्य पत्रं लेखिष्यामि।

**6. निम्नलिखितानां क्रियापदानां मूलधातुम्, लकारम्, पुरुषं वचनञ्च लिखत।**

**उत्तरम्–**

| | क्रियापदम् | मूलधातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| क. | क्रीणामि | **क्री** | **लट् लकारः** | **उत्तम पुरुषः** | **एकवचनम्** |
| ख. | भ्रमति | **भ्रम्** | **लट् लकारः** | **प्रथम पुरुषः** | **एकवचनम्** |
| ग. | गमिष्यामि | **गम्** | **लृट् लकारः** | **उत्तम पुरुषः** | **एकवचनम्** |
| घ. | आसीत् | **अस्** | **लङ् लकारः** | **प्रथम पुरुषः** | **एकवचनम्** |
| ङ. | इच्छामि | **इष्** | **लट् लकारः** | **उत्तम पुरुषः** | **एकवचनम्** |

**7. निम्नलिखितानां पदानां मूलशब्दम्, विभक्तिं वचनञ्च लिखत।**

**उत्तरम्–**

| | पदम् | | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| क. | स्थानात् | = | **स्थानम्** | **पञ्चमी** | **एकवचनम्** |
| ख. | नाम्ना | = | **नामन्** | **तृतीया** | **एकवचनम्** |
| ग. | पाण्डवानाम् | = | **पाण्डव** | **षष्ठी** | **बहुवचनम्** |
| घ. | मनः | = | **मनस्** | **प्रथमा, द्वितीया** | **एकवचनम्** |

**8. वाक्यनिर्माणं कुरुत।**

**उत्तरम्–** क. वस्त्रमिदं साधुतया **द्रष्टव्यं** यत् कस्मादपि कर्तितं न भवेत्।

ख. अहमत्र **प्रातः** एव आगतोऽस्मि।

ग. आपणात् शाकफलानि **क्रीत्वा** आनय।

घ. पितामहं प्रसन्नं दृष्ट्वा पौत्रः अति **प्रसन्नः** अभवत्।

ङ. अहं पाण्डवनगरमपि **द्रष्टुं** गमिष्यामि।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 17 भ्रातृभक्तिः

### अभ्यासः

**1. निम्नलिखतानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. भरतः श्रीरामम् अन्वेषयति।

ख. भरतः स्वात्मने निर्घृणः, कृतघ्नः, तुच्छः, दुस्साहसी, भक्तिहीनादीन् शब्दान् प्रयोजयति।

ग. भरतस्य स्वरसंयोगः श्रीरामस्य हृदयं क्लेदयति।

घ. भरतः श्रीरामम् आलिङ्गयति।

ङ. भरतः श्रीरामस्य पादुके प्रणताय वरं याचते।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. क्व तत्र भवान् **ममार्यो रामः**?

ख. तिष्ठतु तात! अहमेव **निवेदयिष्ये पितृवचनकराय** राघवाय।

ग. इदं शरीरं **प्रहलादय**।

घ. **पितुर्नियोगात्** अहं वनमागतः।

ङ. आर्य! **अन्यमपि वरं** हर्तुमिच्छामि।

**3. सम्यक् उत्तरं ( ✓ ) चिह्नाङ्कितं कुरुत।**

**उत्तरम्–** क. ii. कहाँ    ख. i. आत्मनेपदी

ग. iii. नपुं० तृतीया विभक्तिः

**4. क्रियापदानि चित्वा लिखत।**

**उत्तरम्–** क. प्रविशति    ख. निवेद्यते    ग. तिष्ठति

घ. अभिवादये    ङ. स्थास्यामि

**5. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–** क. ममार्यो = **मम + आर्यो**

ख. किमिति = **किम् + इति**

ग. क्लेदयतीव = **क्लेदयति + इव**

घ. मैवम् = **मा + एवम्**

ङ. अभिषेकोदकम् = **अभिषेक + उदकम्**

**6. निम्नलिखितानां विग्रहाणां समस्तपदं लिखत।**

**उत्तरम्–** **विग्रहः** **समस्तपदम्**

| | | | |
|---|---|---|---|
| क. | भ्रात्रे: भक्ति: | = | **भ्रातृभक्ति:** |
| ख. | न बान्धव: यस्य | = | **अबान्धव:** |
| ग. | रामस्य पश्चात् | = | **अनुरामम्** |
| घ. | प्रिय: साहस: यस्मै स: | = | **प्रियसाहस:** |
| ङ. | राम: च लक्ष्मण: च | = | **रामलक्ष्मणौ** |
| च. | शरणम् आगत: | = | **शरणागत:** |

**7. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. रथेन भरत: आश्रमे प्रविशति।

ख. सीतालक्ष्मणाभ्यां सह राम: प्रविशति।

ग. भरत राममुपगम्य अभिवादयते।

घ. अहं भवत: सेवक: भरत: अस्मि।

ङ. अहं भवत: नाम्ना राज्यस्य रक्षां करिष्यामि।

**8. वाक्यनिर्माणं कुरुत।**

**उत्तरम्–** क. त्वम् अधुना **क्व** गच्छसि?

ख. हे प्रभु! क्षम्यताम्! अहं **कृतघ्न:** अस्मि।

ग. आगच्छ वत्स! **प्रह्लादय** मे हृदयम्।

घ. **प्रयच्छ** मे स्व पादुके।

ङ. अहं तत्र **देहेन** अत्र च मनसा स्थास्यामि।

च. किं **भवान्** माम् अनुग्रहीष्यति?

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 18 रूपाणि प्रत्ययाश्च

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 1 प्रार्थना

## अभ्यासः

**1. निम्नलिखितानां प्रश्ननाम् उत्तराणि लिखत।**

**उत्तरम्–** क. पाठानुसारेण ईश्वरः अस्माकं पिता धरा च अस्माकं जननी अस्ति।

ख. सभी सुखी हों, सभी निरोग (स्वस्थ) हों, सभी कल्याण (अच्छाइयों) को देखें, कोई भी दुःख का भागी न हो अर्थात सब ओर प्रसन्नतापूर्ण वातावरण हो।

ग. बालकाः ईश्वरस्य शरणं ब्रजन्ति।

घ. बालकाः बलं देशरक्षार्थं याचन्ते।

**2. श्लोक पङ्क्ति पूरयत।**

**उत्तरम्–** क. **सुतास्ते** वयं शूरवीराः भवाम।

ख. तदेकं **जगत् साक्षिरूपं** नमामः।

ग. नमस्तेऽस्तु **देवेश बुद्धिं च** यच्छ।

**3. सम्यक् उत्तरं चिह्नांकितं ( ✓ ) कुरूत।**

**उत्तरम्–** क. iii स  ख. i स्त्रीलिङ्गम्  ग. ii दृश्

**4. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. वयं शूरवीराः भवाम।

ख. वयं स्व गुरूजनान् नमाम।

ग. हे ईश्वर! बुद्धिं बलं च मे इच्छ।

**5. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. एक ईश्वर हमारे पिता हैं, एक ही हमारी माता पृथ्वी है।

ख. धर्म के मार्ग से जिसको प्राप्त किया जा सकता है, उस (प्रभु) को मैं सदा नमन करता हूँ।

ग. गुरूजनों और माता–पिता को भी नमन करते हैं।

**6. वाक्यनिर्माणं कुरुत।**

**उत्तरम्–** क. अहं प्रभुं **शरणं** ब्रजामि।

ख. प्रभो! देशरक्षार्थं **बलं** मे प्रयच्छ।

ग. वयं **सर्वे** शूरवीराः भवाम।

### क्रियात्मकं कार्यम्

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 2 डॉ० ए०पी०जे० कलामः

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. पाठानुसारं वैज्ञानिकप्रगतौ डॉ० ए०पी०जे० अब्दुलकलाम महाभागस्य महत्त्वपूर्णं योगदानं वर्तते।

ख. यदा भारतदेशः पोखरणबमविस्फोटेन परमाणुशक्तिमतां देशानां कोटौ समाविष्टः तदा डॉ० कलाममहोदयस्य चर्चा निखिले विश्वे अभवत्।

ग. अस्य महाभागस्य जन्म 15 अक्टूबर, 1931 तमे वर्षे तमिलनाडुप्रदेशस्य रामेश्वरम नाम्नि नगरे सामान्ये मुस्लिमपरिवारेऽभवत्।

घ. वैज्ञानिकश्रेष्ठ महापुरुषोऽयं सद्व्यवहारशीलः, विद्वान, चिन्तकः, देशभक्तः सर्वेषाम् आदर्शकल्पः विद्यते।

ङ. अयं महाभागः प्रक्षेपास्त्राणां निर्माणे दक्षः आसीत्।

च. भारतदेशस्य वैज्ञानिकप्रगतौ अभूतपूर्वं योगदानमवेक्ष्य एव भारतसर्वकारः डॉ० कलाममहोदयाय भारतरत्नं प्रदत्तवान्।

छ. अधुनापि डॉ० कलामहाभागः छात्राणाम्, वैज्ञानिकानाम् विदुषाम्, चिन्तकानां समाजसेविनां च आदर्शः वर्तते।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. अस्य महाभागस्य जन्म **सामान्ये मुस्लिम** परिवारे अभवत्।

ख. असौ निरन्तरं **नूतनाः गवेषणाः** कृत्वा **स्व शिक्षकानपि** आश्चर्यचकितम् अकरोत्।

ग. एषः **वैज्ञानिकमूर्धन्यः प्रक्षेपास्त्राणां** निर्माणे दक्षः आसीत्।

घ. अधुना भारत देशः **उपग्रहाणां प्रक्षेपणे** समर्थः अस्ति।

ङ. धन्यः खलु **कलाममहोदयः** धन्या चेयं **भारतभूः**।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. तमिलनाडुप्रदेशे  ख. i. विज्ञानशिक्षकस्य

ग. iii. 27 जौलाई, 2015 तमे वर्षे

**4. अव्ययपदानि चित्वा लिखत।**

**उत्तरम्–** क. यावतीं, तावतीं, अपि  ख. सर्वदा, एव  ग. यदि तर्हि

घ. यदा, तदा  ङ. अधुना

**5. निम्नलिखितानां पदानां विभक्तिम्, वचनं लिङ्गं च लिखत।**

**उत्तरम्–**

| पदम् | | विभक्तिः | वचनम् | लिङ्गम् |
|---|---|---|---|---|
| क. प्रगतौ | = | **सप्तमी** | **एकवचनम्** | **स्त्रीलिङ्गम्** |
| ख. देशानाम् | = | **षष्ठी** | **बहुवचनम्** | **पुंल्लिङ्गम्** |

| | | | | | |
|---|---|---|---|---|---|
| ग. | कोटौ | = | **सप्तमी** | **एकवचनम्** | **स्त्रीलिङ्गम्** |
| घ. | जन्म | = | **प्रथमा, द्वितीया** | **एकवचनम्** | **नपुसंकलिङ्गम्** |
| ङ. | कक्षासु | = | **सप्तमी** | **बहुवचनम्** | **स्त्रीलिङ्गम्** |
| च. | राष्ट्रैः | = | **तृतीया** | **बहुवचनम्** | **पुंल्लिङ्गम्** |

**6. विशेषणानि विशेष्यैः सह योजयत।**

**उत्तरम्–**

| | **विशेषणानि** | | **विशेष्याणि** |
|---|---|---|---|
| क. | सामान्ये | v. | **परिवारे** |
| ख. | महत्त्वपूर्णम् | iii. | **योगदानम्** |
| ग. | नूतनाः | vi. | **गवेषणाः** |
| घ. | महत् | ii. | **अवदानम्** |
| ङ. | महत्त्वपूर्णाः | iv. | **उपलब्धयः** |
| च. | निखिले | i. | **विश्वे** |

**7. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–**

| | | | |
|---|---|---|---|
| क. | चाऽसौ | = | **च + असौ** |
| ख. | महोदयः | = | **महा + उदयः** |
| ग. | विशेष | = | **वि + शेष** |
| घ. | शास्त्रेऽभवत् | = | **शास्त्रे + अभवत्** |
| ङ. | इत्यादीनि | = | **इति + आदीनि** |
| च. | प्रक्षेपास्त्राणि | = | **प्रक्षेप + अस्त्राणि** |
| छ. | सर्वेभ्यश्च | = | **सर्वेभ्यः + च** |

**8. विपरीतार्थकानि पदानि लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| इदानीम् | = | **तदानीम्** | देशभक्तः | = | **देशद्रोही** |
| विद्वान् | = | **मूर्खः** | यथा | = | **तथा** |
| परिश्रमशीलः | = | **अलसः** | श्रीमती | = | **श्रीमान्** |
| दुर्भाग्यम् | = | **सौभाग्यम्** | जीवनम् | = | **मृत्युः** |
| सफलताम् | = | **असफलताम्** | | | |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 3 राष्ट्रभक्तिः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. यस्मिन् देशे मानवः जन्म प्राप्नोति, तं देशं प्रति तस्य स्वाभाविकी प्रीतिः भवति।

ख. सर्वमपि सुखं तृणवत् परित्यज्य जीवनपर्यन्तं देशभक्ताः देशस्य सेवां कृतवन्तः।

ग. चन्द्रशेखरभगतसिंह प्रभृतयो देशभक्ताः राष्ट्रस्य रक्षार्थं स्व प्राणानां बलिदानम् अकुर्वन्।

घ. यः नरः स्व राष्ट्रं प्रति अनुरागं न कुरुते, तस्य जन्म निरर्थकम् अस्ति।

ङ. ये जनाः देशभक्ताः न भवन्ति, ते सदैव धिक्पात्रतां यान्ति।

च. राष्ट्रं प्रति अस्माकं कर्तव्यम् अस्ति यत् वयं देववत् स्व राष्ट्रस्य सेवां कुर्याम, यदि कश्चित् शत्रुदेशः अस्माकं देशस्योपरि आक्रमणं कुर्यात् तु वयं प्राणपणेनापि तस्य स्वतन्त्रतायाः रक्षां कुर्याम।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. तैः सर्वमपि सुखं **तृणवत्** परित्यक्तम्।

ख. पशुपक्षिषु अपि स्वदेशे **अनुरागो** दृश्यते।

ग. देशभक्ताः देशस्य रक्षार्थं **बलिदानं** कुर्वन्ति।

घ. वयं प्राणपणेन स्व राष्ट्रस्य **रक्षां** कुर्याम।

ङ. राष्ट्रभक्ताः सदा **सम्मानं** प्राप्नुवन्ति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. नपुंसकलिङ्गम्     ख. iii. क्तवतु

ग. ii. अव्ययम्

**4. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–** क. सदैव = **सदा + एव**

ख. स्वतन्त्रतायाश्च = **स्वतन्त्रतायाः + च**

ग. प्राणपणेनापि = **प्राणपणेन + अपि**

घ. पर्यन्तम् = **परि + अन्तम्**

ङ. देशस्योपरि = **देशस्य + उपरि**

च. कश्चित् = **कः + चित्**

**5. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. वयं स्व मातृभूमेः रक्षायै सदैव तत्पराः तिष्ठेम।

ख. यस्य राष्ट्रस्य अन्नं भुक्त्वा वयं पुष्टाः भवामः, तं राष्ट्रं प्रति प्रेम स्वाभाविकः अस्ति।

ग. चन्द्रशेखर आजादः राष्ट्ररक्षायै प्राणानां बलिदानम् अकरोत्।

घ. राष्ट्रभक्ताः सर्वत्र सम्मानं प्राप्नुवन्ति।

ङ. मातृभूमेः ऋणात् वयं तदैव मुक्ताः भवामः, यदा वयं तं प्रति स्व कर्तव्यान् पूरयामः।

**6. विपरीतार्थकान् शब्दान् लिखत।**

**उत्तरम्–** जन्म = **मृत्युः**     सम्मानम् = **अपमानम्**

अनेके = **एकः**     शत्रुः = **मित्रम्**

| | | | | | |
|---|---|---|---|---|---|
| निरर्थकम् | = | **सार्थकम्** | स्वतन्त्रता | = | **परतन्त्रता** |
| स्वदेशम् | = | **परदेशम्** | त्यक्त्वा | = | **गृहीत्वा** |
| सुखम् | = | **दुःखम्** | | | |

**7. समानार्थकपदानि लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| मानवः | = | **मनुष्यः** | देशे | = | **राष्ट्रे** |
| प्रीतिः | = | **स्नेहः** | परित्यज्य | = | **त्यक्त्वा** |
| सम्मानम् | = | **मानम्** | यातनाम् | = | **कष्टम्** |
| व्योमे | = | **गगने** | यशः | = | **कीर्तिः** |
| बलम् | = | **शक्तिः** | | | |

**8. वाक्यनिर्माणं कुरुत।**

**उत्तरम्–** क. महारथी कर्णः गुरोः परशुरामात् धनुर्विद्यायाः शिक्षां **प्राप्नोति**।

ख. सिद्धार्थः गृहं **परित्यज्य** वनं प्रति प्रस्थितवान्।

ग. वर्षाकाले सर्वत्र हरीतिमा **दृश्यते**।

घ. धर्माचारिणः जनाः स्वर्गं **यान्ति**।

ङ. वयं प्राणपणेनापि स्व राष्ट्रस्य रक्षां **कुर्याम**।

च. अनेके वीरमहापुरुषाः भारतभूमौ जन्म **अलभन्**।

**9. सर्वनामपदानि चित्वा लिखत।**

**उत्तरम्–** क. यः, यस्मिन्, तं, तस्य

ख. अस्य, वयं

ग. अस्माकं, यैः,

घ. ये, ते

ङ. इयमेव, यया, वयं

च. वयं

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 4 आदिकविः वाल्मीकिः

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. ऋषिः वाल्मीकिः स्व शिष्यैः सह स्नातुं तमसानद्याः तीरं गच्छति स्म।

ख. स्व सहचरस्य वियोगेन व्याकुलितायाः क्रौञ्च्याः रोदनम्, उच्चैः क्रन्दनं दयनीयां दशां च दृष्ट्वा वाल्मीकिः ऋषिः द्रवितोऽभवत्।

ग. क्रौञ्चीक्रन्दनात् उत्पन्नः शोकः श्लोकरूपेण मुखात् निर्गमनानन्तरं वाल्मीकिः ऋषिः कविपदं प्राप्तवान्।

घ. ब्रह्मणा ऋषिम् आदिशत् यत् रामायणकाव्यस्य रचनां कुरु तस्मिन् च रामचरितं वर्णय येन रामस्य पुण्यं चरितं विदित्वा लोकाः सन्मार्गस्यानुसरणं कुर्युः।

ङ. काव्येऽस्मिन् वाल्मीकिना पितुः आज्ञापालनम्, भ्रातृस्नेहम्, परोपकारः, दया, दाक्षिण्यम्, दीनरक्षा इत्यादिकं वर्णितम्।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. पुरा **वाल्मीकि** नाम्नः एकः **ऋषिः** आसीत्।

